श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्भागवत पुराणे प्रह्लादेन

# ॥ श्री नृसिंहस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री नृसिंहस्तुतिः ॥

प्रह्लाद उवाच

ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः
सत्त्वैकतान मतयो वचसां प्रवाहैः।
नाराधितुं पुरुगुणैरधुनापि पिप्रुः
किं तोष्टुमर्हति स मे हरिरुग्रजातेः॥ १ ॥

मन्ये धनाभिजन रूप तपः श्रुतौज-
स्तेजः प्रभाव बल पौरुष बुद्धि योगाः।
नाराधनाय हि भवन्ति परस्य पुंसो
भक्त्या तुतोष भगवान् गजयूथपाय॥ २ ॥

विप्राद् द्विषड्गुणयुतादरविन्दनाभ-
पादारविन्द विमुखाच्छ्वपचं वरिष्ठम्।
मन्ये तदर्पित मनो वचने हितार्थ-
प्राणं पुनाति स कुलं न तु भूरिमानः॥ ३ ॥

नैवात्मनः प्रभुरयं निजलाभ पूर्णो
मानं जनादविदुषः करुणो वृणीते।
यद्यज्जनो भगवते विदधीत मानं
तच्चात्मने प्रति मुखस्य यथा मुखश्रीः॥ ४ ॥

तस्मादहं विगत विक्लव ईश्वरस्य
सर्वात्मना महि गृणामि यथामनीषम्।
नीचोऽजया गुण विसर्गमनुप्रविष्टः
पूयेत येन हि पुमाननुवर्णितेन॥ ५ ॥

सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो
ब्रह्मादयो वयमिवेश न चोद्विजन्तः।

www.prapatti.com

क्षेमाय भूतय उतात्म सुखाय चास्य
 विक्रीडितं भगवतो रुचिरावतारैः॥ ६ ॥

तद् यच्छ मन्युमसुरश्च हतस्त्वयाद्य
 मोदेत साधुरपि वृश्चिक सर्पहत्या।
लोकाश्च निर्वृतिमिताः प्रतियन्ति सर्वे
 रूपं नृसिंह विभयाय जनाः स्मरन्ति॥ ७ ॥

नाहं बिभेम्यजित तेऽतिभयानकास्य-
 जिह्वार्क नेत्र भ्रुकुटी रभसोग्र दंष्ट्रात्।
आन्त्र स्रजः क्षतज केसर शङ्कु कर्णा-
 न्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात्॥ ८ ॥

त्रस्तोऽस्म्यहं कृपण वत्सल दुस्सहोग्र-
 संसार चक्रकदनाद् ग्रसतां प्रणीतः।
बद्धस्स्व कर्मभिरुशत्तम तेऽङ्घ्रि मूलं
 प्रीतोऽपवर्ग मरणं ह्वयसे कदा नु॥ ९ ॥

यस्मात् प्रियाप्रिय वियोग सयोग जन्म-
 शोकाग्निना सकलयोनिषु दह्यमानः।
दुःखौषधं तदपि दुःखमतद्धियाहं
 भूमन् भ्रमामि वद मे तव दास्ययोगम्॥ १० ॥

सोऽहं प्रियस्य सुहृदः पर देवताया
 लीला कथास्तव नृसिंह विरिञ्च गीताः।
अञ्जस्तितर्म्यनुगृणन् गुणविप्रमुक्तो
 दुर्गाणि ते पद युगालय हंस सङ्गः॥ ११ ॥

बालस्य नेह शरणं पितरौ नृसिंह
 नार्तस्य चागदमुदन्वति मज्जतो नौः।
तप्तस्य तत् प्रतिविधिर्य इहाञ्जसेष्ट-
 स्तावद्विभो तनुभृतां त्वदुपेक्षितानाम्॥ १२ ॥



www.prapatti.com

यस्मिन् यतो यर्हि येन च यस्य यस्माद्
यस्मै यथा यदुत यस्त्वपरः परो वा।
भावः करोति विकरोति पृथक् स्वभावः
सञ्चोदितस्तदखिलं भवतः स्वरूपम्॥ १३॥

माया मनः सृजति कर्ममयं बलीयः
कालेन चोदितगुणानुमतेन पुंसः।
छन्दोमयं यदजयार्पित षोडशारं
संसार चक्रमज कोऽतितरेत् त्वदन्यः॥ १४॥

स त्वं हि नित्य विजितात्मगुणः स्वधाम्ना
कालो वशीकृत विसृज्य विसर्ग शक्तिः।
चक्रे विसृष्टमजयेश्वर षोडशारे
निष्पीड्यमानमुपकर्ष विभो प्रपन्नम्॥ १५॥

दृष्टा मया दिवि विभोऽखिल धिष्ण्यपानां
आयुः श्रियो विभव इच्छति याञ्जनोऽयम्।
येऽस्मत् पितुः कुपित हास विजृम्भितभ्रू
विस्फूर्जितेन लुलिताः स तु ते निरस्तः॥ १६॥

तस्मादमूस्तनु भृतामहमाशिषोज्ञ
आयुः श्रियं विभवमैन्द्रियमा विरिञ्चात्।
नेच्छामि ते विलुलितानुरुविक्रमेण
कालात्मनोपनय मां निज भृत्य पार्श्वम्॥ १७॥

कुत्राशिषः श्रुति सुखा मृग तृष्णि रूपाः
क्वेदं कलेबरमशेष रुजां विरोहः।
निर्विद्यते न तु जनो यदपीति विद्वान्
कामानलं मधुलवैः शमयन् दुरापैः॥ १८॥

क्वाहं रजःप्रभव ईश ! तमोऽधिकेऽस्मिन्
जातः सुरेतर कुले क्व तवानुकंपा।

www.prapatti.com

न ब्रह्मणो न तु भवस्य न वै रमाया
यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः॥ १९ ॥

नैषा परावर मतिर्भवतो ननु स्यात्
जन्तोर्यथाऽऽत्मसुहृदो जगतस्तथापि।
संसेवया सुरतरोरिव ते प्रसादः
सेवानुरूपमुदयो न परावरत्वम्॥ २० ॥

एवं जनं निपतितं प्रभवाहि कूपे
कामाभि काममनु यः प्रपतन् प्रसङ्गात्।
कृत्वाऽऽत्मसात् सुरर्षिणा भगवन् गृहीतः
सोऽहं कथं नु विसृजे तव भृत्य सेवाम्॥ २१ ॥

मत्प्राण रक्षणमनन्त पितुर्वधश्च
मन्ये स्वभृत्य ऋषिवाक्यमृतं विधातुम्।
खड्गं प्रगृह्य यदवोचदसद्विधित्सुः
त्वामीश्वरो मदपरोऽवतु कं हरामि॥ २२ ॥

एकस्त्वमेव जगदेतदमुष्य यत्त्वं
आद्यन्तयोः पृथगवस्यसि मध्यतश्च।
सृष्ट्वा गुण व्यतिकरं निजमाययेदं
नानेव तैरवसितस्तदनु प्रविष्टः॥ २३ ॥

त्वं वा इदं सदसदीश भवांस्ततोऽन्यो
माया यदात्म परबुद्धिरियं ह्यपार्था।
यद्यस्य जन्म निधनं स्थितिरीक्षणं च
तद्वै तदेव वसुकालवदष्टितर्वोः॥ २४ ॥

न्यस्येदमात्मनि जगद्विलयाम्बु मध्ये
शेषेऽऽत्मना निजसुखानुभवो निरीहः।
योगेन मीलित दृगात्मनि पीतनिद्र-
स्तुर्ये स्थितो न तु तमो न गुणांश्च युङ्क्षे॥ २५ ॥

तस्यैव ते वपुरिदं निजकाल शक्त्या
सञ्चोदित प्रकृति धर्मण आत्मगूढम्।
अम्भस्यनन्त शयनाद् विरमत्समाधे-
र्नाभेरभूत् स्वकणिकावटवन्महाब्जम्॥ २६ ॥

तत्संभवः कविरतोऽन्यदपश्यमानः
त्वां बीजमात्मनि ततं स्वबहिर्विचिन्त्य।
नाविन्ददब्द शतमप्सु निमज्जमानो
जातेऽङ्कुरे कथमु होपलभेत बीजम्॥ २७ ॥

स त्वात्मयोनिरति विस्मित आश्रितोऽब्जं
कालेन तीव्र तपसा परिशुद्ध भावः।
त्वामात्मनीश भुवि गन्धमिवाति सूक्ष्मं
भूतेन्द्रियाशयमये विततं ददर्श॥ २८ ॥

एवं सहस्र वदनाङ्घ्रि शिरःकरोरु-
नासास्य कर्ण नयनाभरणायुधाढ्यम्।
मायामयं सदुपलक्षित सन्निवेशं
दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः॥ २९ ॥

तस्मै भवान् हय शिरस्तनुवं च बिभ्रत्
वेद द्रुहावति बलौ मधुकैटभाख्यौ।
हत्वाऽऽनयच्छ्रुतिगणांस्तु रजस्तमश्च
सत्त्वं तव प्रियतमां तनुमामनन्ति॥ ३० ॥

इत्थं नृतिर्यगृषिदेवझषावतारैः
लोकान् विभावयसि हंसि जगत्प्रतीपान्।
धर्मं महापुरुष पासि युगानुवृत्तं
छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम्॥ ३१ ॥

नैतन्मनस्तव कथासु विकुण्ठनाथ
संप्रीयते दुरित दुष्टमसाधु तीव्रम्।



www.prapatti.com

कामातुरं हर्ष शोक भयैषणार्तं
    तस्मिन् कथं तव गतिं विमृशामि दीनः॥ ३२॥

जिह्वैकतोऽच्युत विकर्षति मावितृप्ता
    शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित्।
घ्राणोऽन्यतश्चपलदृक् क्व च कर्म शक्ति-
    र्बह्व्यस्सपत्न्य इव गेहपतिं लुनन्ति॥ ३३॥

एवं स्वकर्म पतितं भव वैतरण्यां
    अन्योन्य जन्म मरणाशन भीत भीतम्।
पश्यञ्जनं स्वपर विग्रह वैर मैत्रं
    हन्तेति पारचर पीपृहि मूढमद्य॥ ३४॥

कोन्वत्र तेऽखिल गुरो भगवन् प्रयास
    उत्तारणेऽस्य भव संभव लोप हेतोः।
मूढेषु वै महदनुग्रह आर्तबन्धो
    किं तेन ते प्रिय जनाननुसेवतां नः॥ ३५॥

नैवोद्विजे पर दुरत्ययवैतरण्याः
    त्वद्वीर्य गायन महामृत मग्नचित्तः।
शोचे ततो विमुख चेतस इन्द्रियार्थ-
    माया सुखाय भरमुद्वहतो विमूढान्॥ ३६॥

प्रायेण देव मुनयस्स्व विमुक्ति कामा
    मौनं चरन्ति विजने न परार्थ निष्ठाः।
नैतान् विहाय कृपणान् विमुमुक्ष एको
    नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये॥ ३७॥

यन्मैथुनादि गृहमेधि सुखं हि तुच्छं
    कण्डूयनेन करयोरिव दुःख दुःखम्।
तृप्यन्ति नेह कृपणा बहु दुःख भाजः
    कण्डूतिवन्मनसिजं विषहेत धीरः॥ ३८॥

www.prapatti.com

मौन व्रत श्रुत तपोऽध्ययन स्व धर्म-
व्याख्या रहो जप समाधय आपवर्ग्याः।
प्रायः परं पुरुष ते त्वजितेन्द्रियाणां
वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम्॥ ३९ ॥

रूपे इमे सदसती तव वेदसृष्टे
बीजाङ्कुराविव न चान्यदरूपकस्य।
युक्तास्समक्षमुभयत्र विचिन्वते त्वां
योगेन वह्निमिव दारुषु नान्यतः स्यात्॥ ४० ॥

त्वं वायुरग्निरवनिर्वियदम्बु मात्राः
प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च।
सर्वं त्वमेव सगुणो विगुणश्च भूमन्
नान्यत् त्वदस्त्यपि मनो वचसा निरुक्तम्॥ ४१ ॥

नैते गुणा न गुणिनो महदादयो ये
सर्वे मनःप्रभृतयः सहदेवमर्त्याः।
आद्यन्तवन्त उरुगाय विदन्ति हि त्वां
एवं विमृश्य सुधियो विरमन्ति शब्दात्॥ ४२ ॥

तत् तेऽर्हत्तम नमस्स्तुति कर्म पूजाः
कर्म स्मृतिश्चरणयोः श्रवणं कथायाम्।
संसेवया त्वयि विनेति षडङ्गया किं
भक्तिं जनः परमहंस गतौ लभेत॥ ४३ ॥

॥ इति श्री नृसिंहस्तुतिः संपूर्णा ॥

www.prapatti.com